# गेल डी0 ए0 वी0 पब्लिक स्कूल
## गेलगाँव, दिबियापुर
## कार्यपत्रक 1 ( 2026–27)
## विषय – संस्कृत
## कक्षा – 7

**प्रश्न 1. अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

एकः बालः आसीत् सः बंग प्रदेशे एकस्मिन् विद्यालये पठति स्म । सः अतीव जिज्ञासुः आसीत् । परन्तु सः पठने कुशलः न आसीत् । सः यत् पठति तत् विस्मरति स्म। सहपाठिनः तस्य उपहासं कुर्वन्ति स्म। सः चिन्तयति – किम् अहं मूर्खः अस्मि ? किं मम भाग्ये विद्या न अस्ति? परन्तु अहं तु पठितुम् इच्छामि। तदा किं कर्तव्यं ? एकदा सः मार्गे एकं कूपम् अपश्यत् । कूपस्य उपरि एकः घटः आसीत् । सः घटस्य अधः एकं गर्तम् अपश्यत् । सः अचिन्तयत्–इमं सुन्दरं गर्तं कः निर्मितवान्? सः मातरम् अपृच्छत्– मातः! अहं कूपे घटस्य अधः एकं गर्तं अपश्यम् । तम् गर्तं कः निर्मितवान् ? माता अवदत्–पुत्र! प्रतिदिनं भूयोभूयः घट–स्थापनेन सः गर्तः निर्मितः।

**एकपदेन उत्तरत–**

(क) 'किं मम भाग्ये विद्या न अस्ति?' कः चिन्तयति ?

(ख) एकदा सः मार्गे किम् अपश्यत् ?

**पूर्णवाक्येन उत्तरत–**

(क) विद्यालये कीदृशः छात्रः आसीत् ?

(ख) माता किम् अवदत् ?

**निर्देशानुसारं उत्तरत–**

(क) 'एकस्मिन् विद्यालये' अनयोः पदयोः विशेषणपदं किम्?

(अ) एकस्मिन्　　(ब) विद्यालये　　(स) सः

(ख) 'पाठशाला ' अस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(अ) विद्यालयः　　(ब) बंगप्रदेशः　　(स) घटः

**प्रश्न. 2 आम् अथवा न लिखन्तु –**

(क) सिंहः वनस्य राजा आसीत्।　　..............................................

(ख) गुहायाः स्वामी एकः श्रृगालः आसीत्।　　..............................................

(ग) किम् अभ्यासः परमो गुरुः।　　...................................... ........

(घ) किं बालकः उपहासेन दुखी आसीत्।　　..............................................

**प्रश्न. 3. मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि मंजूषायाः सहायतया पूरयित्वा पुनः लिखन्तु–**

परीक्षाभवनात् .

तिथिः.......................

प्रियमित्र (1) **.....................**

सप्रेम (2) **.................................**

अत्र सर्वं कुशलं तत्रास्तु। अद्यैव तव पत्रं प्राप्तम्। अहम् पाठ्यपुस्तके एकां (3) **................** अपठम्। तस्याम् एकः बालः आसीत् । सः पठने अकुशलः आसीत् । एकदा सः (4) ....................... ..एकं कूपम् अपश्यत्। कूपस्य उपरि पाषाणशिलायाम् एकं गर्तं दृष्ट्वा बालः तस्य विषये मातरम् अपृच्छत्। माता अवदत् पाषाण शिलायां पुनः पुनः (5)............................... एषः गर्तः निर्मितः। बालः अचिन्तयत् यदि (6) ............................. पुनः पुनः घटस्थापनेन (7)........................**....** अभवत् तर्हि मम अपि पुनः पुनः पठनेन तीव्रा भविष्यति। एवं सः (8)............................. कृत्वा बुद्धिमान् अभवत्।

आशां (9)........................यत् कथां पठित्वा त्वमपि पठनाय प्रेरितः भविष्यसि (10).........................नमो नमः।

भवतः मित्रम्

सुबोधः

**मंजूषा – (कथाम्, परिश्रमं , नमो नमः ,मार्गे, दिनेश , पाषाणशिलायां , घटस्थापनेन, करोमि, पितृभ्याम् , गर्तः)**

**प्रश्न. 4.** स्थूलपदस्य स्थाने समुचितं प्रश्नवाचकपदं चित्वा प्रश्ननिर्माणं कुर्वन्तु–

(क) पशवः **सिंहात्** भीताः आसन्। (कस्मात्, कस्याः, केभ्यः )

(ख) **पशूनाम्** संख्याः न्यूनतरा अभवत्। ( कासाम् ,केषाम् , कस्य)

(ग) **छात्रः** मूर्खः आसीत्। (काः, कः, के )

(घ) **घटस्य** अधः एकः गर्तः आसीत्। ( केन , कस्य, कौ )

# गेल डी0 ए0 वी0 पब्लिक स्कूल
## गेलगाँव, दिबियापुर
## कार्यपत्रक 2 ( 2026–27)
### विषय – संस्कृत
### कक्षा – 7

**प्रश्न.** 1. **निम्नलिखित वाक्यानि निर्देशानुसारं परिवर्तयन्तु –**

(क) त्वं नमसि। **(लङ्.लकारे)** ..........................................................................................................

(ख) छात्रौ पठतः। **(लृट्लकारे)** ..........................................................................................................

(ग) रमा पाठं पठति। **(लङ्.लकारे)** ..........................................................................................................

(घ) यूयम् लिखथ । **(लृट्लकारे)**) ..........................................................................................................

**प्रश्न.**2. **उचितानि अव्ययपदानि चित्वा रिक्त स्थानानि पूरयन्तु –**

(क) लोके सत्यम् ........................... जयते।

(ख) ................................ मम परीक्षा भविष्यति।

(ग) त्वम् ..................... पठसि?

(घ) रामेण सह सीता ...................... वनम् अगच्छत्।

**मंजूषा ( कदा, एव, अपि, श्वः )**

**प्रश्न. 3. रेखांकितपदेषु उपसर्गान् संयोज्य विभज्य वा लिखत –**

(क) सः सर्वम् **अवगच्छति।**

(ख) वानरः वृक्षम् **आरोहति।**

(ग) प्राचार्यः छात्रान् **उप + दिशति।**

(घ) नृपः सेवकान् **निर् + दिशति।**

प्रश्न. 4 अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषा माध्यमेन संस्कृतेन पंचवाक्यानि रचयत–

.




( क्रीडन्ति, विशालं, विद्यालयस्य, पादकन्दुकेन, सुन्दरं, विकसन्ति, प्रसन्नाः, हस्तौ, नृत्यति, वृक्षाः )

क.————————————————————————————

ख.————————————————————————————

ग. ————————————————————————————

घ. ————————————————————————————

ङ. ————————————————————————————